M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

No. Ser. ૨૭૦

Title: Pravasha Vidhi

270

प्रवास विधिः

:	Pravāsa Vidhi	:	Title
:	:	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
270 :	:	दे	: Remarks

श्रीगणेशाय नमः॥ अथ प्रवासविधिः॥ यस्मिन्ग्रामेऽग्नयः संति तस्मात्स्वस्य
ग्रामांतरे एकरात्रं वसेत्प्रवासः॥ तं करिष्यन्नाहिताग्निर्विहरणपक्षेऽग्नीन्विह
त्य प्रज्वाल्य आजस्रपक्षे प्रज्वाल्य विहाराद्बहिराचम्य तीर्थेन प्रविश्य गा
र्हपत्यस्य पश्चाद्दक्षिणोत्तरेणोपस्थेनोपविश्य प्राणानायम्य तिथ्याद्युल्लि
ख्य श्रीपरमेश्वरप्रीत्यर्थं प्रवासविधिं करिष्य इति संकल्प्य तत्राकृतस्ती
र्थेन प्रपद्याहवनीयस्य प्रत्यगुदक्स्थित्वा तमुपतिष्ठते॥ शंस्य पशून्मे पाही
ति॥ ततउत्तरेण विहारं गत्वा गार्हपत्यस्य प्रत्यगुदक्तिष्ठन् तमुपतिष्ठते। १
नर्य प्रजां मे पाहीति॥ प्रत्यग्गार्हपत्यं गत्वा दक्षिणाग्नेः प्रत्यगुदक्तिष्ठन्
तमुपतिष्ठते॥ अथर्व पितुं मे पाहीति॥ तत्रैव तिष्ठन्नगपत्य गार्हपत्या

हवनीयावुपतिष्ठते॥ इमान्मे मित्रावरुणौ गृहान्गोपायतं युवं॥ अविन
ष्टान्वीहृतान्पूषेनान्ननिरक्षत्वस्माकं पुनरायनादिति॥ ततो यथाग
तमाहवनीयसमीपमेत्यागमनाय प्रदक्षिणमावर्तमानः आहवनीयु
मुपतिष्ठते॥ मम नाम प्रथमं जातवेदः पितामाताच धेदे तुर्यदये॥ त
त्वं बिभृहि पुनराममैतोस्तवाहं नाम बिभराण्यग्न इति॥ नृसिंहः॥ इमा
न्मे इति सौत्रेणावेक्ष्य चानलौ॥ यथागतं गतागत्यं कृत्वाग्नीनप्रदक्षि
णं॥ पुनराहवनीयं च गत्वा तेनैव वर्त्मना॥ मम नामेति मंत्रेणातमुपस्था
यपन्नसोऽइति॥ ततः पृष्ठतोऽग्नीननवेक्षमाणो माप्रगामेति सूक्तं स
कृज्जपेन् यथेष्टं गच्छतु॥ माप्रगाम पथो वयं मा यज्ञादिंद्र सोमिनः॥

आधान

मांतस्थुर्नोअरातयः॥ योयज्ञस्यप्रसाधनस्तंतुर्देवेष्वाततः॥ तमाहुतेन
शीमहि॥ मनोन्वाहुवामहेनाराशंसेनसोमेन॥ पितॄणांचमन्मभिः
आनएतुमनःपुनःक्रत्वेदक्षायजीवसे॥ ज्योक्चसूर्यंदृशे॥ पुनर्नःपि
तरोमनोददातुदैव्योजनः॥ जीवंव्रातंसचेमहि॥ वयंसोमव्रतेतवमन
स्तनूषुबिभ्रतः॥ प्रजावंतोअशीमहीति॥ ततोग्न्यागारछदिर्दर्शनं
यावक्रत्वावाचंविसृजेत्॥ छदिराच्छादनं अथेष्टाग्नागामिनंपंथानंआ
प्यब्रूयात्॥ सदासुगःपितुमांअस्तुपंथामध्वादेवाओषधीःसंपिपृक्त॥ २
भगोमेअग्नेसख्येनमृध्याउद्रायोअश्यांसदनंपुरुक्षोरिति॥ यद्वाती
र्थंनिप्रविश्यगार्हपत्यस्यवायव्यांस्थितःसर्वानग्नीन्सकृदेवोपति

ष्ठेत॥ अननयंवोनयंमेअस्त्विति ततःप्रदक्षिणमावृत्यतीर्थेनैवनि
ष्क्रम्यमाप्रगामेत्यादिपठेत्॥ इतिप्रस्थानविधिः॥ यद्यकृतप्रवासवि
धिराहिताग्निर्दैवान्मानुषाद्वानिमित्तात्प्रवासमापद्येत॥ तदात्रैवस्थि
तःप्रक्रांतदिग्गामिमुखउपाति॥ क्रमेणाग्नीन्ध्यात्वातद्दिगाननपर्वोप
तिष्ठेत्॥ इहैवसंतत्रवसंतंत्वाग्नेहृदावाचामनसावाबिभर्मि॥ तिरा
मासंतेमाप्रहासीज्ज्योतिषात्वावैश्वानरेणापतिष्ठतइतिप्रत्यग्नि
मंत्रावृत्तिः॥ अथप्रवसिततस्यनियमः॥ वपनंपर्वणिप्रयातेनिय
तंचव्रताचरणं॥ होमेष्टिकालयोर्यजमानमंत्रजपःक्रमात्॥ इष्ट्वा

आश्वा०न

दौतत्क्रियाः कार्यास्तु पत्नीमध्वर्युणा गृहे॥ विष्णुक्रमान्तर्पणे तु कुर्या
प्रत्येयत्नतां तु इति॥ अथ प्रवासादागतस्य विधिः॥ प्रत्येत्य स्वग्राम
सीमां प्राप्य ब्रूयात्॥ अपि पंथामगन्महि स्वस्ति गामनेहसं॥ येन वि
श्वाः परि द्विषो वृणक्ति विंदते वसु इति॥ ततो वाग्यतः समिद्धस्त पुत्रेण
शिष्येण वा विहृतान्नग्नीनुज्ज्वलतः कृत्वाऽऽचम्य तीर्थेन प्रविश्याह
वनीयस्य पश्चादुपविश्य तं समीपं गत्वा तमीक्षेत॥ विश्वदानीमा
भरंतोऽनातुरेण मनसा॥ अग्ने मा ते प्रतिवेशा रिषाम॥ नमस्ते अ
स्तु मीळ्हुषे नमस्त उपसमन॥ अग्ने अभ्रंशुं न स्वतनः संभर प्याञ्जेति॥

अथानीताः समिधो विकल्प्य तस्याग्नेः समीपे निधाय पूर्ववत् स्थि
त्वाहवनीयमुपतिष्ठते॥ मम नाम तव च जातवेदो वाससी इव विव
सानौ चरावः॥ इति विभृत्वो दक्षसे जीवसे च यथायथं नौ तन्वौ जात
वेद इति॥ अथोपनिहितां समिधं प्राङ्मुख उपविश्य आहवनीये
ऽभ्यादध्यात्॥ अगन्म विश्ववेदसमस्मभ्यं वसुवित्तमं॥ अग्ने
सम्राळभि द्युम्नमभि सह आयच्छस्व स्वाहेति॥ अग्नय इदं०॥
अथ तथैव गार्हपत्ये॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्रजया वसु
वित्तमः॥ अग्ने गृहपतेऽभि द्युम्नमभि सह आयच्छस्व स्वाहेति॥

आधान

अग्नगं तथैव दाक्षिणे॥ अयमग्निः पुरीष्यो रयिमान्पुष्टिवर्धनः॥
अग्ने पुरीष्याभि द्युम्नमभि सह आयच्छस्व स्वाहेति॥ अग्नं॥ अथ
४ तत्रैवातिष्ठन्गार्हपत्याहवनीयौ युगपद्दीप्यते॥ इमान्मे मित्रावरु
णौ गृहान् जूगुपतं फवे॥ अविनष्टानविहृन्पूषैनानभ्यरक्षीदा
स्माकं पुनरायनादिति॥ यथेतं प्रत्येत्याहवनीयसमीपं गत्वास
र्वस्य विहारस्य परिसमूहनं कृत्वा॥ दक्षिणविहारादुपविश्य भूर्भु ४
वः स्वरोमिति वाचं विसृजेत्॥ वाग्यतेषु॥ एतदेवं कृत्वाज्यसंस्क
स्कन्नूरिति गार्हपत्ये स्रुवाहुतिं जुहुयात्॥ न कुर्याद्वैष्णवीजपं॥

दशरात्रोर्ध्वं प्रवासे तु आहवनीयसमीपे गमनानंतरं गार्हपत्यआ
ज्यसंस्कृत्य तूष्णीमुपस्तरकृ स्रुवं निष्टप्य स्रुचि चतुर्गृहीत्वाह
वनीये जुहुयात्॥ मनोज्योतिर्जुषतामाज्यं मे विछिन्नं यज्ञं समि
मं दधातु॥ या इष्टा उषसो याश्च निम्रुचस्ताः संतनोमि हविषा घृतेन
स्वाहेति॥ मनस्त्वोत्तिष्ठ दूदं॥ ततः परिसमूहनवाग्विसर्गौ विति
विशेषः॥ ततस्तत्रस्थ एव॥ गृहानीक्षेत॥ गृहा मा बिभीतोपवस्त्व
त्येवास्मासु च प्रजायध्वं मा च वो गोपतीरिषदिति॥ अथ गृहान्प्रति.
पद्यते॥ गृहानहं सुमनसः प्रपद्येऽवीरघ्नो वीरवतः सुवीरान्॥ इरां

आधान

५ वहंतोघृतमुक्षमाणास्तेषुवहं सुमनाः संवीशानीति॥ अथाग्निवेश्मा
नुवीक्षमाणः॥ द्विवंशाग्मेशायोः शायोरितिजपेत्॥ पद्ध॥ अपि पंथा
मगन्महीत्यक्त्वा विहृतान्कुलतः आचमनादि विधाय गार्हप
त्यस्य समीपे स्थित्वाग्नयं वोऽग्नयं मे स्थितत्सूपरि समूहनादि
शेषं समापयेत्॥ दशरात्रादूर्ध्वं प्रवासे तु एवमुपस्थितयमेनस्थे
तीं हुत्वा परिसमूहनादि॥ अनयोः पक्षयोऽयं पूर्वं कृत्वागतः आ
त्यतमेवामत्सकुर्यात्॥ अनुपस्थिताग्नेः प्रवासे तु इहैव सन्नि ८
त्येतावदेव नान्यत्किंचित्॥ अथ पुत्रस्य शिरस्त्रि परिगृह्य ज

जपति॥ अंगादंगात्संभवसि हृदयादधिजायसे॥ आत्मा वै पुत्रना
मासि स जीव शरदः शतमिति॥ आवृत्तैकुमार्यै॥ विदितममप्य
लौकिकेन तदह श्रीपयेयुः॥ यद्यालयैम इत्येवेदमंत्रेण होपतिष्ठेत॥
दूरप्रवासे सर्वोक्तोपस्थितिर्निकटे त्वियं॥ केचिद्दूरे प्राहुः समुच्च
यमिति॥ नृसिंहकारिकायां संवत्सरादूर्ध्वं प्रवासे तु पावित्रेष्टिः॥
जीवति मृतश्राद्धे तु अपेयुरनये अष्टाकपालेन यजेत॥ इष्टि
स्थाने स्वर्णाहुतिं वा कुर्यादिति देवव्रातः॥ ॥इति प्रवासविधिः॥